चितप्रकृतिविकृतिरूपेषुसर्वेषुसोमेषुप्राप्तिसत्वादितिचेन्मैवंतेषांप्राप्तेरपिक्रत्वंगत्वप्रतिप्रसवार्थत्वस्यैवलाघवेनयुक्तत्वात्।तथाहियएवंविद्वानग्निंचिनुतइत्यनारम्भाधीतवाक्येनाग्नेरप्ययनसंस्कार्यत्वंप्रकृतंचचयनप्रकरणेऽचयननिर्वर्त्यस्थंडिलोपरिदेशस्थापनद्वारकंपर्यवस्यतिस्थंडिलनिर्वर्तकेनचयनेनसंस्कृताग्नेःसंस्कार्यत्वायोगात्।तेनसंस्कार्यत्वंचायतनविशेषनिहितेषुसंभारेषुनिधानरूपेणाधानेनसंस्कार्यत्वंवदग्नेसंहवनीयात्मनोत्पादनत्वमिति-आधानपवमानेष्टिसोमेवलदुत्पत्तेः-अन्यथाचयननिर्वर्तितेस्थंडिलेग्निस्थापनात्प्राचीनेषुअग्निहोत्रदर्शपूर्णमासादिषुअग्निमतिक्रतौस्थंडिलनिर्वर्तनेःप्राचीनेषुदीक्षणीयादिषुचाहवनीयानायप्रसंगात्।एवंचाहवनीयस्यसतश्चयनसंस्कारस्यैकैमर्थक्रियाकांक्षायामाहवनीयःसामान्येनक्रत्वर्थतयायदाहवनीयेजुहोतीतिवाक्येनसिद्धेविशिष्यचयस्यक्रत्वपूर्वस्योपयोगीस्थंडिलेनिधीयतेतादर्थ्यमेवतद्द्वारापर्यवस्यतिकिंचसोमप्रयोगसंबंधेनचयनस्यसोमप्रयोगाद्धिरनुष्ठानुमशक्यतयातन्मध्यएवानुष्ठानंस्यात्पाशुकधर्मजातस्याग्नीषोमीयपश्वंगत्वमिवानुष्ठानस्यादृष्टरूपेणस्थानप्रसादेनापिक्रत्वर्थत्वंप्राप्नोति।एवंप्राप्नुवतश्चक्रत्वर्थत्वस्यपशुकामादिवाक्यैश्चयनसंस्कृतस्याग्नेःफलसंयोजनंकुर्वद्विरपवादःप्राप्नोति।वाचनिकफलेनफलाकांक्षाशांत्याकृतूपकारस्यफलस्याकल्पनीयत्वादेवक्रत्वर्थत्वापवादेप्राप्तेस्तन्निप्रसवार्थत्वमग्निहोत्रादिवाक्यानीत्युक्तंप्रतिप्रसवेपिविधिलाघवस्यप्राग्दुपपादितत्वात्।तस्माद्य

थायएवंविद्वान्षोडशिनंगृह्णातीतिज्योतिष्टोमप्रकरणान्नातवाक्योत्पन्नस्यषोडशिनाविकृतवीर्य
कामःस्तुवीतेतिफलविनियोगवचनायोदितप्रकरणस्यज्योतिष्टोमांगत्वंस्यषोडशियागस्यासत्या
प्यग्निष्टोमेराजन्यस्यसुरग्रहीयादप्युक्थ्येग्राह्योतिरात्रेब्राह्मणस्योत्तरेहनिग्रहोरात्रस्यगृह्यतेमध्यमोत्रिरात्र
स्यचतुर्थेहन्यहीनस्यगृह्यतइतिवाक्येः ऋत्वर्थतासिद्धिरेवमग्नेरपि अग्निष्टोमादिवाक्यैः ऋत्वर्थता
सिद्धिरेवमग्नेरपि अग्निष्टोमादिवाक्यैः ऋत्वर्थतासिद्धिःस्यादेवेत्याशंक्याहनित्याक्षाम्यस्यशेषत्वात्प्रकृति
मपिसमापद्यतांलिंगतोग्निःसोंगंसन्नाघवाक्यैः प्रकृतिविकृतिषु स्याद्विरात्रादिगोपि।। ३२।। तद्धाक्षान्ता
द्यावाक्यैस्त्रिरात्रिरपिनिरविलाहर्गणेत्रापितेग्नेर्विधावुर्वंचगत्याप्रकृतमिहविधेर्नातमग्नेःस्तुवेतु
।।३२।। एवमग्निष्टोमादिवाक्यानांऋत्वर्थत्वंविधिरूपतामुपपाद्यतावत्किमित्यविधावव्याप्तिरिष्यते। न
तावदग्निष्टोमेनानुयजंतीतिविधीतस्यप्रकृत्यग्निष्टोमेग्निप्राप्त्यर्थत्वात्।। नचवाच्यमग्निष्टोमशब्दो
विकृत्यग्निष्टोमस्यापिसाधारणः।। अतस्तत्रातिदेशतोग्निप्राप्तिःसंजनयतीतिदीयाग्निविध्यंशेव्याप्ति
रितिप्रकृतिविकृत्यग्निष्टोमांगत्वविधिरेकत्वेनतद्विध्यप्रदत्तावग्नेःप्रकृत्यग्निष्टोमंगत्वासिध्यान्यत्रा
तदतिदेशस्यासंजनत्वात्।। नापितेमुक्थ्येनतमतिरात्रेणेतिविध्योरव्याप्तिःतयोरप्यग्निष्टोमवाक्या
वसत्रहतिविकृतिसाधारणत्वात्। ननुप्रकृतिनूतयोरप्युक्थ्यातिरात्रसंस्थावतोःऋत्वोरग्निष्टोमवि
कारत्वात्तत्रोदकासंजनवत्प्राप्तिकस्याग्नेस्तयोःपुनर्विधानंगुणकामप्राप्त्यर्थमितितद्विध्योरव्याप्तिः।

स्यादेवेतिचेदुच्यते।। नतावदग्निष्टोमविकारौतयोरप्यग्निष्टोमवत्प्रकृतिनूतज्योतिष्टोमात्मकत्वात्।।
ज्योतिष्टोमस्यैवस्ववल्वग्निष्टोमोवक्ष्यषोडशातिरात्रसंज्ञिकाश्चतस्रःसंस्थाः। तत्राग्निष्टोमसंस्थाचसम
वत्प्रकृत्यर्था। उक्थ्याग्निसंस्थास्तुपशुकामउक्थ्यंसुरग्रहीयाषोडशिनावीर्यकामःस्तुवीतातिरात्रेणप्रजा
कामंयाजयेदितिज्योतिष्टोममाश्रित्यफलार्थतयाविहितत्वाद्दोहनवत्सुकृषार्थाइतिविशेषः। अग्नि
ष्टोमादिसंस्थाइतिचाग्निष्टोमादिसंज्ञैकैःस्तोत्रैःक्रतोःसंपन्नयउच्यतेसंपूर्वस्यतिष्ठतेर्धातोःसमाप्तिवा
चित्वात्। ततश्चयथाफलायगोदोहनेग्रहणेवत्तदाश्रयोदर्शपूर्णमासोप्रकृतिनूतोएवंफलार्थमुक्थ्या
दिसंस्थानुष्ठानेपितदाश्रयोज्योतिष्टोमःप्रकृतिनूतएवभवति। प्रकृतौचतत्रनातिदेशाद्दृष्टेःप्राप्तिर्नाप्य
ग्निष्टोमवाक्यरूपादुपदेशात्। तेनाग्निष्टोमसंस्थावत्येवहितस्मिन्नग्निःप्राप्यतेनतुसंस्थांतरवत्सापि।
यथाग्रवतीबर्हिरस्त्वितिवाक्येनाग्रवतीबर्हिःसाम्नोवतस्मिन्प्राप्यतेनतुरथंतरसाम ----
---संस्थस्यातिरात्रसंस्थस्यचेज्योतिष्टोमस्यांगत्वेनात्रापिग्निरुक्थ्यातिरात्रवाक्यान्नविधीयते।।
उक्थ्यातिरात्रशब्दोरुक्थ्यातिरात्रसंस्थाविकृतिसाधारणेप्यग्निष्टोमवाक्योक्त्यायेनविकृतिष्वप्य
ग्नेरप्राप्तस्यविधीनवतइतियोरथ्याग्निशंकानवकाशा। नापिअग्निवाक्येभ्योग्निःद्विरात्रादिषग्नि
ष्टोमोक्थ्यातिरात्रसंस्थानामूर्ध्वंसत्रेनतेषुप्रकृतिविकृतिसाधारणातिष्टोमादिवाक्यैरेवाग्नेरुपदेशो
ऽस्यतदधीनगुणकामप्राप्तेश्चसंबंधनतयातेषांगुणकामप्राप्त्यर्थाग्निविधिरूपत्वस्यवक्ष्यमा
णत्वात्। नचतेषुषोडशीसंस्थांस्याप्यूर्ध्वंसंजनयेनतास्मिन्नहनिषोडशिसंस्थेप्रकृतिनूतज्योतिष्टोमा
नाधिकृत्यसुपपन्नाषोडशीसंस्थेप्रकृतौप्रदेशिकफलसंपादनस्यनिष्फलत्वात् औपदेशिकंगानुष्ठानमेवास्तितदाश्रि

इवाग्नेरौपदेशिकत्वं तेनोनवत्त्वमतइति तदर्थं द्विरात्रादिवाक्यजातेस्यादिति वाच्यं। तेष्वग्निष्टोमादिसं
स्थानामप्यङ्गसहेनाग्निस्तेषामप्यंगंस्यादिति तदंगत्वलाभ्यामित गुणकाम श्रुत्यस्तुपपन्या षोडशा
संस्थेह्यग्नेरौपदेशिकत्वसंपादनस्यनिष्फलत्वात्। औपदेशिकांगानुष्ठानमेवहितदाग्नित गुणकाम श्रु
त्तिप्रयोजकंननुयत्तत्स्यांगस्योपदेशेननश्रुत्तिस्तदुपकारकत्वात्तावोपिगौरवात्। किंतहिद्विरा
त्रादिवाक्यानिकुर्वंतु-अग्निष्टोमादिवाक्यैःसर्वेष्वहर्गणेषुप्राप्तस्याग्नेर्द्विरात्राद्यहर्गणेष्वग्नेरिक्तेभ्यः अग्निक्षेप
रूपांपरिसंख्यांकुर्वंतु। षोडशिग्रहविषयद्विरात्रादिवाक्यानीवाहरंतरेभ्यः। अग्निक्षेपरूपांपरिसं
ख्यां। अतएवषोडशिनोवैरूपत्वं। तत्रहिउक्तविधानादित्यधिकरणे षोडशग्रहस्याग्निष्टोमादिष्वंग
त्वविधानादतिदेशतःसंतत्वप्राप्तिरूपद्विरात्रादीनांतत्तत्राहनिपुनर्विधानंपरिसंख्यार्थमिति
सूक्तमाम्नातंपरिसंख्यानार्थमितिसूत्रेण। ननुषोडशिग्रहणवाक्येष्वग्निष्टोमादिशेषाणांअहन्यहनिमा
त्रपरत्वात्द्विरात्रादिष्वतिदेशतःप्राप्तिर्नकिंमात्रमितित्तत्वप्राप्तपरिसंख्या। इहह्यग्निवाक्येषु
तेषांग्रहणंविकृतिपरत्वात्सुपगमादुपदेशतएवद्विरात्रादिनामहरंतरेष्वपिप्राप्तिरस्तीतिप्राप्त
परिसंख्यायांत्रैरोप्यंस्यादितिचेत्। तर्ह्यत्रद्विरात्रादिवाक्यानिसमानेतरविधीनांस्तुतिंकुर्वंतु॥ एव
मेतेग्निष्टोमादिष्वग्निविधयःप्रशस्तापनेष्वपविधानमात्रेणद्विरात्राद्यहर्गणेष्वप्यग्निर्वक्ष्यतइति
इत्थमेवलोगिरसोद्विरात्रेरोऽश्वमुत्तरइतिवचनमुत्तरेहन्द्विरात्रस्यग्रह्यतइतिद्विरात्रसामान्य

वचनप्राप्तस्यषोडशिनोद्विरात्रांतरेभ्यःपरिसंख्यार्थमितिवृत्तिकारांतरमतेप्राप्तपरिसंख्येनत्रैरोप्यं
स्यादित्यपरितुष्यतान्नाप्यङ्गतातस्यैवैरूपानसंपूर्वेहन्सामनवतीतिसमनंतरविधिस्तावत्कंमुक्त
पूर्वस्याङ्गवैरूपानसांरूप्यस्यैवैरोपिकगुणविधियुक्तः। यदुत्तरस्याप्यङ्गःषोडश्याख्योवैरूपिकोगुणोव
र्ततइत्येवंचित्येनस्तोतीतितस्माद्द्विरात्रादिवाक्येष्वपिनाग्निशंकावकाशइतिचावः। ननुत्रअग्निष्टोमा
दयःषोडशिग्रहाग्निष्टोमादिवाक्येष्विवअनुवादतयैवगृह्यंतांनविहितत्वेपि। ततश्चद्विरात्रादिगतेष्व
ग्निष्टोमोक्थातिरात्रिसंस्थेष्वहस्सुप्रकृतिभूतेस्तोमादिस्वरूपोद्भावनंसंनवत्प्राप्तिकस्याग्नेर्वि
धानंगुणकाम्यप्राप्त्यर्थमेवस्ववेन्नतस्तुस्य ---------- प्रायत्वात्।।
-प्रतिदेशिकपरिसंख्यायाःअप्राप्तविषयत्वेनत्रैरोप्यस्यावेप्यग्निअकरणसन्निहितगुणकामप्राप्त्यर्थ
त्वसंभवेऽसन्निहितद्विरात्रादितद्गतिरिक्तानेकाहर्गणेअकरणंततत्तद्वोद्वाक्यानुसंधानंजन्याग्निया
वर्तनकल्पकल्पनस्यायुक्तत्वात्। तहिषोडशिग्रहविषयद्विरात्रादिवाक्यान्यपिपूर्ववाक्यसन्निहितराज्ञ्या
दिनिमित्तप्रायत्स्यर्थमेवस्युःननुद्विरात्राद्यहरंतरज्योदकपर्यंतोचनाज्ज्यषोडशिग्रहपरिसंख्यार्थानी
तिचेत्तथैवसंतु। अतएवशास्त्रदीपिकायांषोडशिग्रहविषयेद्विरात्रादिवचनमनैमित्तिकत्वार्थमित्यु
क्तं। तस्माद्युक्तमेहद्विरात्रादिवाक्येष्वप्यग्निकथनमित्यांशंकायाह। अग्निष्टोमादयश्चेत्सप्रकृतयइहनस्या
समानंविधानंसंकोचश्चस्मृतीनांक्वचननयविदांनिमित्तोनयुक्तः। तस्माद्व्याप्तिरग्नेर्विधिषुनघटतेव

र्णि तावदेव हनेष्टित्यादेपस्मिन्नत्रवक्तुंनयक्षरणिचयैः शक्यमेतावदेव॥ ३३॥ यद्यत्राग्निष्टोमादिशब्दाः
अङ्गनिमात्रपराःस्युस्तदाग्नहणेसमानविधानंस्यादितिसूत्रोक्तंअङ्गनिविहनिभङ्गेःसामानविधंनास्ति
ध्येत्। एकविधिविधेयत्वंहिसामानविधेः। नच्चत्रोपदेशरूपनयैकरूपेविधित्विविधेयच्चमात्रंतद्धिय
॥८०॥ त्तितावतैवविहनिषुगुणकामप्राप्तिफलस्यलाभात्। नत्वेकविधिविधेयच्चपर्यंतंविवक्षितंताव
त्पर्यंतविवक्षायांफलाभावात्। प्रतिवाहर्गलिष्टग्नित्वत्समानेविधानंस्यादितिदृशमाध्यायसूत्रेणतथै
वताव त्पर्यंतस्यैष्टीकरणच्च। तत्रहिद्वादशाहे-अनीकायोरथंतरंरहस्सामोराधयोर्बृहच्छ्रोदक्काहेऽवाय
वस्तुकामस्यप्राप्तिसंभवेकिमर्थंतयोःपुनर्विधानमितिचेत्। शंकायांसामानविध्यर्थमितितत्राजमुक्तमिति
वदतिदृष्टांतउपन्यस्तःतत्रदृष्टांतेकेचिद्ब्रह्मनिविहत्योर्नविधेयैकरूप्यमस्तितत्रहितौयदिरथंतरसामासाम
इत्यादिविधिर्विहितौचैंदवायवाग्रेग्रथमंहरित्यादिविधिरितितत्रैद्वात्। किंतूपदेशरूपतयाब्रह्मनेवैब्रह्म
नविध्योरेकरूप्यमात्रंतत्रेतदृष्टांतेनापिसामानविधंनमितुमर्हतीतिचेत्। नचत्रैवमग्न्यतिग्राह्य
धिकरणसूत्रसंगतिस्तदीयतंत्रत्वन्तसंगतिस्तुनस्यात्। तत्रहियेब्रह्मनाग्निविधीनांपरिसंख्याशमार्थं
सामानविध्येननिराकृतं। तदस्मात्तिः प्रथमहोत्रध्यानेस्थीकृतं। तत्तुतदासंगच्छतेयदिब्रह्मनिविहनिभङ्गे
रेकविधिविधेयत्वंस्यात्। तत्रिन्नविधिविधेयत्वेहिब्रह्मनविधिनाक्तप्रोपकारस्यागतेर्विहनिविशेषेषुपुनर्वि ॥८०॥
धानंगृहमेधीयाज्येनागविधानवत्परिसंख्यार्थमस्तितिशंकासामानविध्येननिराकर्तुमशक्यत्वात्।

प्रकरण

अतएवास्मात्तिः पूर्वश्लोकेब्रह्मताग्निविधिस्तोक्तिन्नानांद्विरात्रादिषग्निविधीनांपरिसंख्याद्यपक्षोपिदूषि
तः॥ नत्वस्तुवैब्रह्मताग्निविधीनांपरिसंख्याच्चनिराकरणेहेतुर्विशेषनिर्देशकृतंत्रत्वन्तमात्रस्यासंगतिस्तथा
पिसूत्रादिसामंजस्यावैकल्यादग्निष्टोमादिशब्दानांब्रह्मनिमात्रपरत्वान्नुपगमेकोदोषइतिचेत्तेषामविशेष
ब्रह्मत्वस्तुतिरूपाणांनिर्निमित्तःब्रह्मनिषुसंकोचएवदोषः। तेहिन्यायविदोनानुमन्यंते। नहिकोऽग्निग्रहवाक्य
गताग्निष्टोमादिशब्दानांज्योतिष्टोमेमहाप्रकरणेनिमित्तिकामंजुहोतीत्यत्रजुहोतेरितिकर्तव्यताकांक्षा
यांजावांतरेणैमिवनेहानारभ्याधीताग्निष्टोमादिशब्दानांकिंचित्संकोचकमस्तिसंकोचानाभेचयथा
हवनीयेजुहुतीत्यनारभ्याधगतंजुहोतेः प्राप्तंवैकल्यंसकलहोमपरत्वंनिवेहाग्निष्टोमादिशब्दानांब्र
ह्मनिविहनिरूपस्यकलाग्निष्टोमादिपरत्वमेवन्याय्यं॥ तस्मात्ब्रह्मनिविहनिसाधारणेरग्निष्टोमादिवाक्ये
रेवद्विरात्रादिषग्निग्रार्थ्यंब्रह्मनिवेषपितदाश्रितगुणकामजोर्नद्विरात्रादिवाक्यानांपूर्वश्लोकोक्तरीत्या
परिसंख्यार्थत्वंस्तुत्यर्थत्वंचानभ्युपगम्यास्वीकरणीयमितितेष्वपिनास्त्यापत्तिः। अतोविषयसप्तम्यपेक्षैवै
ब्रह्मताग्निविधेयत्वाद्विरात्रादिस्तुतिर्निरालंबनेतिसिद्धांतमेवमाक्षेपेमीमांसान्यायविद्भिरेतावदेवोत्तरं
वक्तुंशक्यं। किंतर्हितिचेत्तत्राहुः॥ अग्निष्टोमादिशब्दाःब्रह्मनिविहनिसंस्थाग्निसंस्तुतानामग्राह्यत्वा
न्नालंसंस्थानंप्रथममथनवेद्यांत्यनामतंसंस्थानंतत्तत्यक्त्वाद्विरात्रब्रह्मनिषुविधेयश्योदकग्राह्यम
ग्निष्टोमेनाक्तत्वादिलक्षणोविधइतिनेष्टंताव्याप्तेनेति॥ ३४॥ पूर्वश्लोकोक्तरीत्यासंकोचेकारणाभा

वादिनेऽग्निष्टोमादिशब्दाः प्रकृतिविकृतिनिमित्तानिनः संतुनाम-अत एव प्रकृतिसामान्यविधात्परिसंख्याच्च
मनुपपन्नमिति तत्रेदमुत्तरं वचनमप्यग्निष्टोमादिवाक्यन्यायेनाश्रयेण युज्यते। तथापि विकृतिरूपान्सा
वनग्निष्टोमादिन्नस्पृशंति किंत्वग्निष्टोमादिसंस्थावतः-क्रतुविशेषानन्विच्छतोयेषु क्रतुषु श्रुत्यप्तात्पर्या
लास्तत्तत्संस्थाः संति तेषुप्राघ्रेयकुंभ्यपाक्रूपेषु प्रथममग्नवलरंतिनावलानेराकांक्षात्।। शिष्टानांविरम्येव्यापा
राज्ञावाच्यतदनंतरंचित्यंबलोपस्थितिकेषुचोदकप्राप्तेषुक्रतुषुनावतरंतिनिष्पूर्णमयादिवाक्यस्थि
तजुह्वादिशब्दैरुचोदकप्राप्तासुवेत्रतजुह्वादिषु। उपांशुपोर्णमास्यायजतीतिवाक्यप्राप्तावेदर्शपूर्णमासा
धिकारवाक्यस्थपूर्णमासपदमिवांतरंगविधिसामर्थ्यलब्धपौर्णमासिकालेउपांशुयाजे।-प्राहवनीयगा
र्हपत्यगतजुहोतेरप्यग्नेयश्चस्वकालत्वादित्यधिकरणेसर्वहोमसाधारणेनांगीकृतंकिंतुयेविकृतिष्ठासाधारणेषूक्तनि दि २
मित्तसाध्यउपदिष्टानक्रतूंदिष्टास्तत्साधारणेनैवांगीकृतंतन्मात्रसाधारणेक्रतुष्टसाधारणेषूक्तनि
मित्तस्यव्यापारअसंकीर्तिः। अत एवातिदेशाप्राप्तेषुहोमेषाहवनीयस्याप्यतिदेशेनैवप्राप्तिस्तदधिकर
णयात्तिकेदर्शितिः। ततश्चाहवनीयेनसहैवास्यातिदेशोनातुप्रकृतौवाधिकृतेत्यर्थेनिष्प्रयोजनत्वेदि
ति। एवंचप्रकृतानामग्निष्टोमादिशब्दानांश्रुत्यप्तात्पर्यातत्तत्संस्थावन्मात्रविषयतयातिष्ठेनाग्नेयकपदेशा ॥८१॥
नः प्रवृत्तिः येषुतुद्विरात्रादिषुश्रुत्यप्तात्पर्यातेसंस्थाविशेषरहितेषुचोदकातद्व्यवहाराहिक्रतुमध्यमदशारा
त्रगततत्संस्थाविशेषलाभः तेषुअग्निष्टोमादिवाक्यरूपोपदेशापत्त्यैक्रत्वतिदेशात्एवाग्नेयाग्निरितिते

षुगुणकामानप्राप्नुयुः-अतस्तेषुसामानविधेनगुणकामप्राप्त्यर्थमग्निपशाविद्विरात्रादिवाक्यानीतिनेष्य
ग्निकथंनयुक्तमितिचेतावदिहयुक्तं। नत्वेवमेवसमाधानमुच्यतांको दोषइतिचेत्तत्राहतत्रैतद्दूषणस्या
नगुणफलविधिष्वत्रचान्यत्राग्निःप्रविंचित्क्रत्वपूर्वान्वयमुपगतवानाश्रयोनानुयाद्यः। किंचाग्निष्टो
मसुख्यक्रतुसमधिगमात्प्राग्नारभ्यवादेश्रुत्याग्निस्तस्मैवयच्चिदपिविशिष्टतावाश्रयत्वेस्तिनेदः॥ ३५ ॥
स्मादिदमुत्तरंयद्यग्न्याग्नेयफलावविधिष्वत्रैवाग्निप्रकरणेन्येषुवाक्रतुप्रकरणेषुकिंचित्क्रत्वपूर्वान्वयि
त्वेनसिद्धोग्निराश्रयत्वेनानुयाद्यःस्यात्।। तथाहियदिप्राग्वाक्यात्प्राप्तगुणफलविधिप्रवृत्तेःकेषुचित्क्रतु
षुप्रकरणेषूपदेशेनकेषुचिदतिदेशेनचतत्तत्क्रत्वपूर्वान्वयग्निःसिद्धःस्यात्तदातिदेशेकरणत्वान्नगुणफ
लविधिस्त्वाश्रयानुवादार्थंक्रत्वग्निसमर्पकःपुरोवादोनस्यात्तदानीमौपदेशिकक्रतुहून्यायेनप्रथमंक्रतु
द्विमवतरत्योपदेशिकाग्नावाश्रयत्वेनान्वितेचरमंमातिदेशिकस्याग्नेरन्वयोनस्यादेवदत्तिः। तस्मादपि न
दाश्रयत्वेनान्वयार्थंनुपदेशः सफलंस्यात्। यदिवातत्रैवप्रकरणेकिंचित्क्रत्वपूर्वान्वयित्वेनसिद्धए
वाग्निरश्रुत्याश्रयनवक्रतुफलविधन्वयीस्यात्तदागोदोहनवदग्न्याग्नेयगुणफलविधिस्तत्रैवक्रतोरव
तिष्ठेतेतिक्रत्वंतरंगाग्नेरपितदाश्रयत्वसिध्यर्थंयन्तांतरंकर्तव्यंस्यात्तन्नत्वेवं। मनारभ्यवादे
रूपेणाग्नेयकरणेऽग्निःश्रेष्ठोमादिवाक्यैःक्रत्वन्वयकरणत्प्राग्वयंवेविधानग्निंचिन्नुतरत्सुत्यनः।
श्रुत्याग्नेःश्रवणात्सादिगुणफलविधिष्वाश्रयत्वेनान्वेतिसोमश्रयोगाक्रहिःकेवलस्याग्नेरनुष्ठानुमप्राप्य

त्वादग्निष्टोमादिवाक्यैस्तस्य क्रतुषु संयोजनाच्च यत्राग्निर्वा तदाश्रिता गुणफलविधय इत्यर्थादेवतेषा
मपूर्वीयाग्निसंबंधः सिध्यति। अर्थात्सिध्येच्चापूर्वीयस्याश्रयत्वं येष्वग्नेरौपदेशिकमपूर्वीयत्वं येषु चाति
देशाधीनं तेषु सर्वेष्वप्यविशेषेण सिध्यति दृष्टस्याग्नेरारोपेण दार्शपूर्णमासिकाप्रणयनाश्रितत्वेना
॥८२॥ वगतस्य गोदोहनस्येष्टं तरातिदिष्टप्रणयनाश्रयणे वैगुण्यवदिह न किंचिद्वैगुण्यमस्ति। एतादृग्वि
षयाभिप्रायेणैवातिदिष्टाश्रयणेनापि गुणकामप्रवृत्तिरंगीकृता। अवैगुण्ये तु भवतु कामस्यापि प्र
वृत्तिरिति तदभिप्रायेणैव भाष्यकारोप्याह तस्मिन्प्रवर्त्तमाने कामोपि प्रवर्त्तत इति। तस्मादतिदिष्टाग्न्याश्र
यणेनापि गुणकाम्यप्राप्तिसंभवान्न तदर्थं द्विरात्रादिवाक्याक्षेपेति भावः। का तर्हि द्विरात्रादिवाक्या
नां गतिः। स्तावकतैवेत्युक्तमिति चेन्नाग्निष्टोमोक्थातिरात्रसरूपतया तद्विधायकतया प्रतीयमा
नानां व्यर्थप्रायस्तुतिपरत्वकल्पनायोगात्। तस्मात्तद्विधित्वनिर्वाहान्यथानुपपत्त्यैवातिदिष्टाश्रयणे
न गुणकामानप्रवर्त्तत इति कल्पयिष्यामः। तथा सति हि गुणकामप्राप्त्यर्थता तेषां भवेदित्यनुशयानं
प्रत्याह॥ वाचस्त्वग्नेर्द्विरात्रप्रभृतिषु परिसंचक्ष्य। तामन्यतोग्निस्तेष्वन्यांगानि यद्वा नियमनमथवा ॥८२॥
तेषु कुर्वंतु तस्य। यद्येताः क्लिष्टगत्या गुणफलभवनप्रापणार्था भवेयुः षोडश्यर्थेष्विव स्यात्तदपि वि
धिफलं तेष्ववश्यं तथापि॥३६॥ यदि द्विरात्रादिवाक्यानां केनचित्प्रकारेण विधायकत्वं वाच्यमिति
निर्बंधस्तदा तान्यहर्गणांतरेभ्योग्नेः परिसंख्यां कुर्वंतु। यदि प्राप्तपरिसंख्यात्रिदोषात्तदपेक्षया व्य

र्थप्रायापि स्तुतिरेव वरमित्युक्तमिति यदि तत्रापरितोषस्तर्हि द्विरात्रादिष्वेव गृहमेधीयाज्यभा
गविधिन्यायेन चोदकप्राप्तांगांतरपरिसंख्यां कुर्वंतु। यदि च द्विरात्रादिष्वतिदेशप्राप्तांगसद्भावे लिं
गानि संतीति तद्विरोधात्तत्राप्यपरितोषस्तर्हि द्विरात्रादिषूत्तरवेद्याः पक्षे प्राप्तावग्नेर्नियमनं कुर्वंतु। तु
द्विरात्रादिचोदकपर्यालोचनालभ्योत्तरवेदिप्राप्त्यपेक्षाग्निप्रकरणाम्नाततदाश्रितगुणकामप्राप्ति
बुद्धिसन्निहितेति तादर्थ्यमेव द्विरात्रादिवाक्यानां कल्पयितुमुचितमिति प्रथमश्लोकव्याख्याने प्रति
त८ पादितमिति चेदिदमपि। तत्र षोडशिद्विरात्रवचनमुदाहृत्य प्रतिपादितमेव सन्निहितफलालाभे प्र
करणांतरस्थचोदकाधीनप्राप्तिसापेक्षो नियमोपि फलं भवितुमर्हतीति॥ इह चान्यतः संभवंती गु
णकामप्राप्तिः फलं न भवतीत्युक्तमेव यद्यपि क्लिष्टगत्या द्विरात्रादिवाक्यानां गुणकामप्राप्त्यर्थत्वं स
मर्थ्यते तथाप्यग्नेर्नियमनमपि फलं संभवन्न निवारयितुं शक्यं न ह्येकस्य वाक्यस्य प्राप्तिनियमप
रिसंख्यास्वेकमेव फलमिति नियमः अनेकरूपसंकरस्य तत्र तत्र वाक्ये बहुशः प्रागुदाहृतत्वात्॥
किंच। द्विरात्रादिवाक्येष्वेव षोडशिग्रहविषयेष्वनेकफलसंकरः सिद्धांतेभिमतो दृश्यते॥ तथाहि। उत्त
रेहन् द्विरात्रस्य गृह्यत इत्यादिवाक्यानि तत्प्राचीनवाक्यसंकीर्त्तितब्राह्मणत्वराजन्यत्वरूपनिमित्ता
भावेपि षोडशिनः प्रापणार्थानीति तावच्छास्त्रदीपिकाकृतोक्तं। तेनैवोत्तरेहन्निति वाक्यं प्रकृत्यतिरात्रे वि
कल्पितस्य षोडशिनस्तथैव द्विरात्रस्योत्तरेहनि प्राप्तौ तन्नियमार्थमिति तंत्ररत्ने प्रतिपादितं। सूत्रकृ

तान्तुषोऽग्निनो वेत्यन्तत्रत्यवाक्यविधानादित्यधिकरणेऽत्तरेहन्नित्यादिवाक्यानि परिसंख्यार्थानीत्युक्तं॥
तत्रहिषोऽग्निग्रहतोज्योतिष्टोमेनयाजयेत्तस्यमध्यमेहन्नित्यादिवाक्यैः कार्त्स्न्येनविहितेसंबंधिद्वाव
गमात्तदनुसारेणाग्निष्टोमोवक्ष्यातिरात्रशब्दानांविग्रहस्याग्निष्टोमादिपरत्वौचित्यात्। अन्यथाग्रहस्य
ग्निष्टोमादिष्वसतस्तस्यातिदेशादिग्रहेतिष्वप्राप्तिसंभवेनमध्यमादिवाक्यवैयर्थ्यप्रसंगादित्यापाद्य
ज्योतिष्टोमग्रहरणगतानोषोऽग्निविषयाग्निष्टोमादिवाक्यानांघादशोपसत्तादिवाक्यवत्तदनन्व
यिपदरहितानांग्रहरणादुत्कर्षयोगात्ग्रहतावपिषोऽग्नीत्याद्यनूद्यग्निष्टोमेतिकिमर्थानितर्हिम
ध्यमादिवाक्यानीत्याक्षेप्तोयामान्नातेपरिसंख्यार्थमितिसूत्रेणातिरात्रोक्थ्याग्निष्टोमसंस्थेषुषडहर्गणा
नांमहरंतरेष्वपिग्रहणराजन्ययोःषोऽग्निनःप्रोक्षतीत्यपरिसंख्यार्थानीत्युक्तं॥किमत्रफलंग्रत्याख्यातव्यं
॥तस्मात्षोऽग्निविषयद्विरात्रादिवाक्येष्वग्निविषयद्विरात्रादिवाक्येष्वप्यनिर्वार्यःफलांतरसंकरः॥
अतःफलांतरेणतेषांविधिच्यनिर्बाहादतिदिष्टाश्रयणेनगुणकामानप्रवर्त्तंतइतिपरिताषानाश्रयाणी
येतिकथमपिद्विरात्रादिवाक्येष्वप्यतिरक्तकांक्षानलक्षणइतिभावः॥एवंद्विरात्रादिवाक्येष्व्याप्ते ॥८३॥
रनवकाग्रात्संग्रहपंचमुपपादितंपशुकामउक्थ्यंगृह्णीयात्षोऽग्निनावीर्यकामस्तुवीतेत्यतिरा
त्रेणयजेतेत्यादिवाक्यानांयाजयेदितिवाक्यानिपश्वादिफलार्थंज्योतिष्टोमाग्निष्टोमोक्थ्यादिसंस्थाःपशुगुणविधायका
नीतिमतमाग्निष्टोमोवक्थातिरात्रवाक्योरप्यव्याप्तेरनवकाग्रात्संग्रहमुपपादितं। येतुमन्यंतेपशुकामादि

वाक्यानिपश्वाद्यर्थमुक्थ्याधिकारवत्तियुक्तप्रकृतसोमयागविधायकानिननुतदाग्निष्टोमोक्थ्यादिसंस्था
मात्रविधायकानि। यत्रहिज्योकृतःक्रतोर्गुणान्वयोलभ्यतेतत्रैवफलायगुणमात्रस्यविधिर्युज्यतेयथा
जोदोहनादेःयत्रतुशास्त्रादेतेनतत्रविधिस्तत्रनसंभवति। गुणाश्रयसंबंधेगुणफलसंबंधेचशास्त्र
व्यापारायोगात्॥किंतुतत्रगुणविशिष्टक्रतोरेवफलायविधानंवाच्यंप्रतएवदक्षायणयज्ञेनस्वर्गका
मोयजेतेत्यादिष्वप्यवत्यादिगुणविशिष्टस्यक्रतोरेवफलायविधानमभ्युपगम्यते। एवंचफलकाम
नानिमित्तकहेतोर्धिकारवत्तियुक्तोक्थ्यादिसंस्थःसोमयागोनित्यवदाम्नानतदनावत्तियुक्तस्याग्नि
ष्टोमसंस्थस्यवसंतेवसंतेज्योतिषायजेतज्योतिष्टोमेनस्वर्गकामोयजेतेतिविधिद्वयप्राप्तनि
त्यकाम्योन्नयावस्थस्यसोमयागस्यविकारइतितत्रदीक्षणीयादेरंगकलापस्यातिदेशेनैवाग्नि
ष्टिर्नतूपदेशेननित्यवदाम्नातदीक्षणीयाद्युपदेशाभ्यथोपस्थितिकनैमित्तिकोक्थ्यादिर्हविष्याग्नि ग्र५
कादेरवत्तियुक्तप्रयोगांतरान्वयकल्पनेहिकृत्तिप्रसंगादितितन्नताम्रयणेनोक्थ्यातिरात्रेत्रोग्नि
वाक्योरतिदेशतःसंग्रहवत्राग्निकाग्निविधिरूपयोरव्याप्तिर्वक्तुंनशक्यतइत्याह॥उक्थ्यादिसंस्थ
फलानांक्रतुसमाधिगम्यतांकोपितेषांतेनाग्निष्टोमसंस्थक्रतुविकृतिकैर्योक्थ्यादिसंस्थोन
सिध्येत्। किंतुस्यात्सार्वकाम्योक्थ्यादिफलनिदासाधिकारायाग्रहणंतुकेषांचिदुक्थ्यादीनांपुंस्त्वस्याग्रहरणपठना

त्सर्वतस्तत्प्रसक्तौ॥३७॥पशुकामऽक्ष्यंगृह्णीयादित्यादिवाक्येषूक्ष्यादिशब्दवाच्यानुक्ष्यादिस्तोत्रैः
क्रतुसमाप्तिरूपानुक्ष्यादिसंस्थामतिलंघ्योक्ष्यादिपशूत्पन्नस्योक्ष्यादिसंस्थाविशिष्टस्यक्रतोः
पश्वादिफलसंगतिरंगीक्रियतेचेत्पशुकामादिवाक्यानिक्रतुफलविधयोनस्युर्वेयुःसर्वेषांकामि
नांइतिवाक्यांतरेणैवक्रतोःपश्वादिसकलफलान्वयसिद्धेः ततश्चोक्ष्यादिसंस्थेक्रतोफलार्थ
स्यविध्यंतरस्यानावात्तद्विधिविधेयउक्ष्याद्यधिकारविनियुक्तःक्रतुरग्निष्टोमसंस्थस्यक्रतोर्विहृ
तिरित्येवंनसिध्येदेव।किंतर्हिपशुकामादिवाक्यैःसिध्यतीतिचेदुच्यते॥यस्तादिवाक्येनजीवद्दृष्टि
कारतयासर्वकामवाक्येनतत्तत्फलकामाधिकारतयाचावगतेऽग्निष्टोमेनज्योतिष्टोमेनवास्वर्ग
एतेयजेतानामुक्ष्यादीनामविशेषेणसंबंधेऽग्नेपशुकामादिवाक्यैरुक्ष्यस्यपशुफलार्थतयासंब
धःषोडशिनोवीर्यफलार्थइत्यादिरूपाव्यवस्थापरंतैर्वाक्यैःसिध्यति॥यथावज्रादिफलत्रयार्थ
विहितसोमरूपहविषांत्रयाणामपिहोत्रादीनांविधानानामविशेषेणतत्संबंधेऽग्नेर्हविर्नि
र्वृष्टिकामायनिधनंकुर्यादित्यिन्नाद्यकामायेतिस्वर्गकामायेत्यादिवाक्यैर्वज्रादिफलेषु
धनमित्यादिव्यवस्थासिध्यतेवंदर्शायणयन्नसांक्रंडस्थायिनेष्वपिदार्शपूर्णमासिकसार्वकाम्यगा
वप्रलब्धस्वर्गपश्वादिफलविशेषेऽन्नावावृत्तिसहस्रस्थानादिगुणव्यवस्थैवसिध्येन्नतुगुणविप्रति
पत्त्यक्रतोःसार्वकाम्यवाक्योदितफलात्फलांतरेणान्वयः।तस्मादुक्ष्यादिवाक्योदितफलानांन्ना

नुसंगतिस्वीकारेणुक्ष्यादीनामग्निष्टोमविकारत्वमितिहेस्तन्मात्राश्रयेणेषूक्ष्यादिशास्त्राग्निवाक्ययो
रध्याहारोनावकाशइतिनावः॥वस्तुतस्तुतेषांक्रतुसंगतिस्वीकारएवायुक्तसंस्थाविशेषविशिष्टेषुक्रतुषू
क्ष्यादिशब्दप्रयोगस्यविशेष्यंनाभिधागोचरत्वलक्षणशक्तिविशेषएवेतिन्यायेनलाक्षणिकैस्तदुक्ष्यादिफलवा
क्येषुचलक्षणाकल्पनेऽमाणत्वात्।नचतेषांगुणाश्रयसंबंधेगुणफलसंबंधेचव्यापारयोगाल्लक्षणा
कल्पनेति।प्रकरणादेवगुणानामाश्रयसंबंधलाभात्॥तस्मादुक्ष्यादिफलवाक्येषुस्तोत्रविशेषैःक्रतुस
मानाश्रयएवोक्ष्यादिशब्दवाच्याःफलायविधीयंते।यत्तुयातस्तुवीतयाजयेदितिस्तुत्यर्थादृष्टेषुनिर्वपत्या
दिवनुवादमात्रं।तदेतत्सर्वंप्राभाकरदीपिकादिष्वेवस्पष्टं।एवमत्राक्षरसोमन्यतोकोपीस्तुक्यासूचितः॥
संस्थास्तुसमानविधानाःप्रकरणविशेषादितिसंस्थाधिकरणेकिंसर्वसंस्थंज्योतिष्टोमंप्रत्यत्पदाद्गुणाद्य
योधर्मोऽग्निष्टोमेप्रकृतस्तेत्यादिनाष्यवचनंतुज्योतिष्टोमस्यैवाग्निष्टोमसंस्थोक्ष्यादिसंस्थस्यचसामा
नविध्यासामानविध्यविचारेपरंनग्राह्यंकिंतुज्योतिष्टोमेनतदाश्रिताभानुक्ष्यादिसंस्थानांपृथक्फल
वत्त्वेनेतिकर्त्तव्यतापेक्षाणांनासामानविध्यासामानविध्यविचारपरंनेतव्यं।अतएवयत्रयत्रक्रतुगतंसामो
नयतितत्रतत्रक्रियायोसाध्यमानायांयांतिकमुपनिपद्यतेसेसाधनस्यवासाध्यस्यचेतिसंदिह्यमानासा
ध्यस्यनचितुमर्हतिनासौसाध्यस्यास्तीतिसाधनेनसंबंधतइतिन्यायेनाष्यवचनंसंगच्छते।इदंहिक्रतो
रुच्याश्रितगुणानांचफलार्थत्वेनेतिकर्त्तव्यतांकांक्षालक्षणप्रकरणविशेषादिलक्षणायादिषुसामानविध्यनि

तिपूर्वपक्षे प्राप्ते सिद्धांतयुक्तिप्रदर्शनं परं। अस्य चेदं तात्पर्यं गुणः फलाय चोद्यमानः पूर्वप्राप्तां परप्रयुक्त
क्रियामाश्रित्य पश्चाच्चोद्यते अंशयुक्ता च क्रिया प्रयुज्यते। ततश्च प्राक्तनस्वतः कर्त्तव्यरूपक्रियाविधिसम
य एवांगविधीनां व्यापारो न पश्चात्। गुणफलविधानेपि विरम्य व्यापारायोगादिति। तस्मादयुक्तं वैकृताग्नि
॥८५॥ विधिष्वपूर्वविधिलक्षणस्याव्याप्तिकथनमित्येवं प्रथमाक्षेपः प्रपंचेनाक्षिप्तः। अथाक्षेपांतराण्यपि यथासं
भवमाक्षिप्यंते। यदुक्तं साप्तदृश्यवाक्यवदभ्युदयार्थत्वांगीकारेण स्वर्गकामादिवाक्येष्वपूर्वविधिलक्षणा
व्याप्त्युद्धारे तस्य नियमपरिसंख्याविध्योरतिव्याप्तिः स्यादिति तत्र साप्तदृश्यवाक्यदृष्टांतकथनमयुक्तमि
त्याक्षिपति॥ तासु स्यात्साप्तदृश्यं प्रकरणरहितं यासु न श्रूयते तत्तास्वस्य स्याद्विकल्पो विकृतिषु कथिते चो
दकात्पांचदृश्ये। सत्येवं मित्रविंदादिषु नियमविधिस्तस्य भूयो विधिः स्यात्सार्थक्ये संभवत्यभ्युदयफलकता के
वलं नैव कल्प्या॥ ३८॥ अनारभ्याधीतसाप्तदृश्यवाक्यस्यापि प्रकरणिकसाप्तदृश्यवाक्यवन्मित्रविंदा
दिमात्रशरणत्वे स्यादेवमगत्याभ्युदयार्थत्वकल्पनं। तदेवासिद्धं तस्य प्रकृतिविशेषकरत्वपर्यवसायि
गत्यंतरसंभवात्॥ तथाहि यासु सौर्यादिविकृतिषु साप्तदृश्यं न श्रूयते तास्वनारभ्यवादप्राप्तं साप्तदृश्यं गत्वा
तिदेशप्राप्तेन पांचदृश्येन विकल्पं प्राप्नोतु मित्रविंदादिषु पुनः साप्तदृश्यविधानं विकल्पाद्यवादरूपं साप्तदृश्य ॥८५॥
नियमार्थमस्तु। एवं सर्वस्यापि साप्तदृश्यवाक्यस्य प्रवृत्तिविशेषकरत्वसंभवे किमित्यन्यतः सिध्यत्यर्थे के
वलादृष्टार्थविधित्वमभ्युपगम्यते॥ नन्वनारभ्याधीतसाप्तवाक्यस्य सौर्यादिगामित्वे सौर्यादिष्वतिदेशात्पां

चदृश्यं न प्राप्नुयात्। उपदेशेनातिदेशबाधादिति चेत्सत्यमन्यत्र तथैवाद्रहतु सौर्यादिषु साप्तदृश्यं पांचद
श्यातिदेशबाधनेन स्वयं नियतत्वं प्राप्नोति चोन्मित्रविंदादिषु पुनः साप्तदृश्यविधानं व्यर्थं स्यात्तथैव मित्रविंदा
दिष्वपि साप्तदृश्यनियमलाभोपपत्तेः। अतो नारभ्याधीतं साप्तदृश्यवाक्यं स्वस्य मित्रविंदादिगतौ स्ववैयर्थ्यं
सौर्यादिगतौ पांचदृश्यातिदेशबाधने प्राकरणिकसाप्तदृश्यवाक्यवैयर्थ्यं चालोच्य सौर्यादिकं गत्वा तत्र पांचद
श्यातिदेशं च सोढ्वा तेन सह विकल्पमनुमन्यते॥ यथा न तोपशौ करोतीति पशावाज्यभागप्रतिषेधस्तत्र चो
दकादाज्यभागयोरप्राप्तावप्रसक्तप्रतिषेधतया स्ववैयर्थ्यं चोदकत्तयोः प्राप्तौ सर्वथा तयोः प्रतिषेधे तत्प्रापकस्य
चोदकस्याप्रामाण्यापत्तिं चालोच्याज्यभागातिदेशं सोढ्वा तदनुष्ठानेन सह विकल्पमंगीकरोति। एवं हि तत्र प्रापक
निषेधशास्त्रयोरिवात्रापि प्राकरणिकाप्राकरणिकसाप्तदृश्यवाक्ययोः प्रवृत्तिविशेषकरतया साफल्यं भवति त
स्मात्केवलादृष्टार्थत्वे साप्तदृश्यवाक्योदाहरणमयुक्तमिति भावः॥ यदुक्तमपूर्वविधिलक्षणे सर्वोद्देश्यानुवृत्तिरप्रा
प्तेरात्यंतिकत्वमिति पक्षे त्रेधा तंदुलान्विभजेदिति विधावव्याप्तिस्तत्र दार्शिकहविषां पूर्वदेवताभ्योपनयस्य व
क्ष्यमाणदेवताभ्यो विभागस्य वा विधौ तेषां मध्ये तंदुलदधिश्रृतेषु देवतापनयस्य विभागयोरर्थसिद्धत्वेनो
पांशुयाजाज्यमात्रे विधेश्चारितार्थ्यस्य वक्तव्यत्वादिति तदाक्षिपति॥ नास्त्येवोपांशुयाजो दधिश्रृतसहितः पौर्ण
मास्यां विधानात्तद्दृश्यं दर्शनं तत्पठितमपि सगाम्नातयाज्यानुवाक्यं। सत्वाचिंतैव तस्य क्वचिदधिकरणे दार्शिके
ष्वस्तितोक्तिस्तत्रेधा तंदुलानित्यनुवदनमतस्तत्र नाव्याप्तिरस्ति॥ ३९॥ दधिश्रृतवत्याममावास्यायामुपां

श्रुयाजो नास्त्येव उपांशुपोर्णमास्यांयजन्तिति पौर्णमास्यांतद्विधानात्। न चवाक्येब्रूचब्राह्मणे-अमावास्याव्रतेउपांशुयाजयाज्यानुवाक्यायुगलपाठात्तत्स्यामपिसोस्तीति।अधानस्योपांशुयाजस्यपौर्णमासी कालचेतदंगतयातत्परतंत्रस्यमंत्रस्यान्यत्रपठितस्यापितद्गामित्वात्॥ अयंचार्थःसूत्रकृतैवदर्शमाधा येमावास्यायामप्युपांशुयाजःस्यादुपांशुयाजमंतरायजतीत्यविशेषश्रवणादितिपूर्वपक्षंकृत्वापिवापौर्ण मास्यांस्यात्प्रधानशब्दसंयोगान्मंत्रोक्तयाप्रधानंस्यादितिसिद्धांतसूत्रेणस्थापितः। अपंचितंचैतच्चतु र्थश्लोकव्याख्याने। नाप्येतच्छंक्यंवक्तुं।अमावास्यायामुपांशुयाजमंगीकृत्याप्युपांशुवचनेवचनाद्यथा व्रततीत्याधिकरणेव्रतिरुपवसतीतितस्यन्यायव्युत्पादनार्थंश्रुत्यानोचितानरूपतयानेतव्यत्वात्।अ न्यथापौर्णमास्यांयजन्तीत्याहत्यपौर्णमासीकालत्वविधायकश्रुतिव्याकोपप्रसंगात्॥ उदाहृतऋत्यवलं बनानुपदोदाहृतदाशमिकाधिकरणविरोधप्रसंगाच्च।तस्मात्रेधातंदुलन्विन्नजेदित्ययंवस्तुभागस्य तंदुलानांमध्यमादित्यावेनविनागस्यानुवादइत्येवयुक्तं।आकरग्रंथेषूक्तरीत्यानुवादत्वपरिहारायदा क्षिकिरविःसामान्येलक्षणंमंगीकृत्यपूर्वदेवतापनयस्यवस्तुभागएवदेवतायोविनागस्यवाविधेयत्वा सुपगमेपितस्यतंदुलदधिग्रहणेषधर्यसिद्धयेनोपांशुपायाजान्तस्यस्यानुवादेनचविधेयाजानेनानुवाद त्वापरिहारात्।तस्मात्रेधातंदुलानित्रिविधोसर्वेदध्यानुवृत्तप्राप्त्यनुवादेनाव्याप्तिवर्णनमयुक्तमितिना वः। एवमन्यदेष्टिवाक्येदाक्षिकिहविषांपूर्वदेवता-स्योपनयस्यापेक्षामंगीकृत्यतत्तत्स्यार्थसिद्ध्याद्विधेये

देवंदृष्टंनागधेयंनाप्येस्त्रीनियतिर्विधि
रितिन्त्रि
कांडी २

यर्थमुक्तं।इहानीतरत्पेक्षैवनास्तीतितंतस्यैवयार्थ्यमाहप्रत्येकंद्रव्ययुगेनपटुघटयितुंदेवतांवाक्य मेकंसाकूप्यस्याविकलंगःपशुफलवचसाकेवलंतद्विधाने।तस्मात्तावद्विशिष्टान्वयिनियतिर्विधावार्त्ति वाकोक्तरीत्यावक्तव्येदेवतानामपनयनविधेरकल्पनंकोपयुक्तं॥४०॥ नवेदृहदाक्षिकिहविषांपूर्वदेवता पनयापेक्षायांदृष्टंतेषांदेवतांतरसंयोजनपरंहेदृष्येष्वग्न्यादिदेवताविधानंदेवता नेदःप्रसज्येत।तथाहिमध्यमादिवाक्यानांदेवतांतरसंयोजनपरत्वेदृष्येष्वग्न्यादिदेवताविधानंदेवता स्तुत्यर्थत्वादिगुणविधानंचेतित्रिष्वपिवाक्येषुतावद्देकोवाक्यभेदः। दधिग्रहतवाक्ययोःस्थविष्ठानांद ध्यनिष्ठानांश्रुतंवाधिकरणेविधेयमित्यपरोवाक्यभेदःतयोस्थविष्ठानामणिष्ठानांचचकजावे पिविधेयइतिःप्रत्योवाक्यभेदः।स्यादेतन्नैवंवाक्यभेदःप्रसरतितथाहिदात्रंग्रहात्रंशिपिविष्टशब्दा नांश्रुत्यैवाग्न्यादिपदसामानाधिकरण्यात्तेदृष्यग्नेःपाकितंविशिष्टदेवताकारकमेवविधेयंनतुदे वतास्तद्गुणाश्चप्रत्येकंविधेयाःप्रत्युदयेष्टिव्रकरणेमहाप्रयतीतिवचनमस्ति।तदेतदेवनैवमाह दधिस्थविष्टयोश्रुतायणिष्ठयोश्चसहपाकविषयं।ततश्चस्थविष्टानामणिष्ठानांचतंदुलानामुत्पत्ता दधिग्रहतयोर्नूर्यस्त्वाच्चतंदुलानांचकृतंदधिग्रहतयोरधिकरणंचार्थात्प्राप्तोत्ति।अर्थाच्चैव तत्सर्वमनुघतेतत्तद्गुणविशिष्टमेकमेवदेवताकारकंविधीयतेमध्यमानांतंदुलानामग्निर्दीतादेवतास्त्व विष्टानांदध्नश्चेंद्रःग्रहानांग्रणिष्ठानांश्रुतस्यचविष्णुःशिपिविष्टइति।अतोनैवंवाक्यभेदावकाशइति

चेत्सत्यमिच्छं सहश्रपणे वाक्यांतरमंगीकृत्य कल्पने उक्तप्रकारेण वाक्यभेदो नास्तीति तथापि प्रकारां
तरेण वाक्यभेदः स्यादेव। दधिवाक्ये दध्नि स्थविष्ठेषु शृतवाक्ये शृते क्षोदिष्ठेषु च प्रत्येकं देवतासंयो
जनात्। इयांस्तु भेदः पूर्वस्मिन्पक्षे स्थविष्ठे देवताप्रणीताकार्ये च दधि विधेयमिति क्षोदिष्ठेषु देव
॥८१॥ ताप्रणीताकार्ये शृतं च विधेयमिति च विधेयभेदात् वाक्यभेदः द्वितीयपक्षे स्थविष्ठेषु दध्नि च क्षोदिष्ठे
षु शृते च देवता विधेयेत्युद्देश्यभेदाद्वाक्यभेद इत्युभयत्राप्यविशिष्टो विध्यावृत्तिलक्षणो वाक्यभेदः।
अपि चात्र मध्यमादिवाक्येषु दाशिकहविषां देवतांतरसंयोजनविधिरिति पक्षे पशुकामार्थमध्यमा
दिवाक्यसारूप्यभंगः प्रसज्येत। एवं हि काम्येष्टिकांडे श्रूयते। या पशुकामः स्यात्सोमावास्यामिष्ट्वा वत्सान
पाकुर्याद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्च
रुं ये णिष्ठास्तान्विष्णुवेशिपिविष्टाय शृते चरुमिति। तत्र पशुकामोष्टिविधौ मध्यमादिवाक्येषु द्रव्यदेव ॥८१॥
ताविशिष्टकर्मविधिरंगीकृतो नवमे। तथात्रापि तथाभूतकर्मविध्यंगीकारे तत्सारूप्यं समंजसं भवति
न तु देवतामात्रविध्यंगीकारे। तस्मादिहाप्यवाक्यभेदाय पशुकामेष्टिवाक्यसारूप्यसामंजस्याय च तत्त
द्द्रव्यविशेषविशिष्टकर्मविधिरेवांगीकर्त्तुं युक्तः। ननु तत्र प्रकृतः कर्मज्ञानाभावादगत्या विशिष्टविधि
रंगीकृतः। इह प्रकृते दर्शकर्मणि प्रत्यभिज्ञायमाने नैमित्तिकदेवतांतरमात्रविधानेन लाघवे संभव
ति न विशिष्टविधिगौरवमंगीकर्त्तुं युक्तमिति चेन्न। आर्त्तिवाक्यन्यायेन प्रकृतकर्मप्रत्यभिज्ञानमना

दृत्याप्यवाक्यभेदाय विशिष्टकर्मांतरविधेरेवांगीकर्त्तुमुचितत्वात्। तथा हि दर्शप्रकरण एव श्रुतेयस्योभयं ह
विरार्त्तिमार्च्छेदैंद्रं पंचशरावमोदनं निर्वपेदिति वाक्ये आर्त्तदोहप्रतिनिधित्वेन पंचशरावद्रव्यमात्रं कर्म
णः साधनं विधीयते न द्रव्यदेवताविशिष्टकर्मांतरं गौरवादिति षष्ठे पंचशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः
स्यादिति सूत्रेण पूर्वपक्षं कृत्वा सिद्धांतितं। प्राप्ते कर्मणि पंचशरावद्रव्यमिंद्रो देवतेति द्वयं विधातुं न शक्य
ते वाक्यभेदप्रसंगात्। न च सान्नाय्यप्रतिनिधौ पंचशरावे सान्नाय्यदेवताया इंद्रस्य स्थानापत्त्या प्राप्तिसंभ
वादिंद्रशब्दोनुवाद इति वाक्यं। सान्नाय्ये महेंद्रस्यापि कदाचित्सद्भावेनेंद्रस्य नित्यप्राप्त्यभावात्। तस्मा
न्नित्यतयेंद्रस्यापि विधेयत्वाद्वाक्यभेदः स्यादित्यवाक्यभेदाय द्रव्यदेवताविशिष्टदोहार्त्तिनिमित्तकर्मांतरवि
धिरेवांगीकर्त्तव्य इति। एवं द्रव्यार्त्त्या प्रकृतस्य सान्नाय्ययागस्य द्रव्यापेक्षायां स्फुटायामपि यदि सत्राय
दीक्षितानां साम्युत्तिष्ठासेत्सोममपभज्य विश्वजिता यजेतेति वाक्यं संकल्पमध्ये सत्रं त्यक्त्वोत्तिष्ठासोः सोमक्र
यात्पूर्वं पश्चाच्चाविशेषेण प्रायश्चित्तं विधायकमिति साम्युत्थाने विश्वजित्क्रीते विभागसंयोगादित्यधिक
रणे निर्णीतं। सोमविभागवचनस्य सोमक्रियानंतरकालोत्तिष्ठासुयजमानकर्तृकस्वकीयसोमांशविभागा
नुवादकत्ववदैंद्रशब्दस्येंद्रयाजियजनामोद्देष्टव्यदेवतानुवादकत्वमिति पक्षप्राप्तानुवादकत्वाभ्युपगमे
न कथंचिद्वाक्यभेदस्य परिहर्त्तुं शक्यत्वेप्येंद्रपदस्य विधेयसमर्पकत्वे संभवति निरर्थकपाक्षिकानुवाद
त्वं न कल्पनीयमिति न्यायमात्रमवलंब्य वाक्यभेदाय कर्मांतरविधावंगीकृते किमु वक्तव्यमभ्युद

येष्विवाक्येकर्मांतरविधिरंगीकर्त्तव्यइति। नहिनत्रेद्रव्यसंबंधस्यैवात्रयत्किंचिद्द्रव्यदेवतासंबंधस्यप
त्रेपिप्राप्तिरस्तियेनदधिवाक्येऽप्रतवाक्येचप्रतिद्रव्यंदेवतासंबंधलोधनेनश्रुतोवाक्यभेदः कथंचिदपिपरि
हीयेत। नबातत्रद्रव्यमात्रविधिपक्षोऽपिकप्रश्रुतकर्मांतरव्याकांक्षानिमित्तद्रव्यापचारानुकीर्त्तनवद्दिहद्दे
वतामात्रविधिपक्षोऽपिकदेवताकांक्षानिमित्तदेवतापचारानुकीर्त्तनमस्ति। नचत्रेधातंद्वानितिवाक्यस्य
देवतापनयविधिपरत्वेस्पष्टंयेनतद्विधिबलादपनीतपूर्वदेवतानोहविषोदेवताकांक्षास्तात्तिसमर्थ्येत
किंतुतंदुजराष्टस्यदार्ष्टिकहविःसामान्यपक्षकल्पनयातद्विभागप्रतियोगिनीनांशाद्यानुयाज्यानांदेव
तानांकथंचिदुपस्थित्यैकल्पनीयं॥ नचैवंकल्पनायांकिंचित्कल्पकमस्तिमध्यमादिवाक्यानां वा
क्येषुश्रुतहविषांदेवतांतरविधिरवतांकांक्षार्थंपूर्वदेवतापनयमपेक्ष्यमात्रेणस्रेधानाक्यस्यत
द्विधायकत्वकल्पकइतिचेत्। नावाक्यभेदप्रसंगेनतेषांश्रुतहविःसंबंधिदेवतांतरवि
धिपरत्वसिद्धेः। देवतापनयविधिबलादेवतेषांदेवतांतराकांक्षयासेत्स्यतिवाक्यभेदंमध्यमादिवाक्येषु
देवतांतरविधिरस्त्वपगम्यतइत्यप्युच्यते। चैत्यरस्यराश्रयोनात्तिवर्त्तितुंशक्यते॥ ननुमध्यमादिवाक्यानां
श्रुतानांकर्मसंबंधिगुणमात्रविधायकत्वेसंभवतिश्रुतहानमप्रश्रुतकल्पनंविशिष्टविधिगौरवमपूर्व
कर्मांतरकल्पनागौरवंवावश्यंपरिहरणीयं। संभवतिचात्रश्रुतहविःसंबंधिदेवतामात्रविधानं। यदि ॥८८॥
तावदधिभूतवाक्ययोः प्रतिद्रव्यंदेवतासंबंधलोधनेनवाक्यभेदोस्ति-मस्तुसएकोदोषः नह्येकस्माद्दो

षाद्बिभ्यताबहवोदोषाःस्वीकरणीयायद्दिवाक्यभेदोवश्यंपरिहरणीयस्तदामध्यमादिवाक्यानांद्रव्यदेवता।
विशिष्टेकप्रयोगविधायकत्वमस्तुतत्रस्थानेकगुणविशिष्टेककर्मविधाविवावाक्यभेदोनप्रसरति। अश्रु
तहानुप्रश्रुतकल्पनमपूर्वकर्मांतरकल्पनंचनभवतिप्रश्रुतस्यैवदर्शकर्मणोद्रव्यदेवताधिकार
विशिष्टप्रयोगविधानादितिचेत्तर्ह्यग्निवाक्येप्येवमेवकर्मांतरविधिर्नस्यात्। वस्तुतस्तुतत्रैवार्जवेनद्र
व्यमात्रविधिर्द्रव्यदेवताविशिष्टेकप्रयोगविधिरितिवाकल्पनेनप्रश्रुतहानाद्दयः परिहर्त्तुंशक्यंतेतत्रद्रव्य
मात्रविधिपक्षेप्येंद्रपदस्यपक्षप्राप्तानुवादकत्वेनवाक्यभेदपरिहारःसंभवात्। इहदेवतामात्रविधिप
क्षेतत्परिहारःसंभवात्। तत्रैकस्यैवलिंङ्श्रवणेनतावद्विकारविशिष्टेकप्रयोगविधायकत्वंसंभवात्
इहमध्यमादिवाक्यत्रयेलिङ्त्रयश्रवणेनविकारगणोचानेकवाक्यगतत्वेनावद्विकारविशिष्टेकप्र
योगविधायकत्वकल्पनावकाशात्। नचमध्यमादिवाक्येष्वेकैकवाक्योद्दिष्टविकारविशिष्टःप्रयोगा
त्रयंविधीयतइतियुक्तंनवासिद्धांताभिमतमेकस्मिन्नेवप्रकरणेदर्शप्रयोगःप्रकाशोपकरणनिमि
त्तमात्रास्तुपगमात्। परमार्थतस्तूनयश्चाप्यिप्रयोगाविधिपक्षस्तुषः प्रकृतस्यदर्शप्रयोगस्यया व
ज्जीवंवाक्रमेणकालवाक्येनवाविहितस्यविधीयमानपेक्षात्रयोगांतरविधेश्यानभिमतत्वादन्यदेयेष्व
धिकरणेप्रकृतेनप्रयोगेदेवतांविकारोपपादनात्। दर्शस्तुतविशिष्टप्रयोगस्यासन्नयतानुष्ठा
नुमशक्यत्वेनसान्नाय्यसंयोगमसन्नयतःस्यादित्यधिकरणेऽसन्नयतोप्यनुदयेस्थापितव

दर्शेयंतत्र विकारश्च फले

दि८

नासिद्धांतिनाम ध्यमादिवाक्येषुतत्तद्देवतान्वितदधिभूतविशिष्टप्रयोज्यविधेरंगीकर्त्तुमशक्यत्वाच्च।।
दधिभूतयोर्देवतांतरविधानार्थमिनुवाद्यत्वेहि पक्षप्राप्तयोर्यथाप्राप्तिपक्षिकानुवादइत्यसन्नयतोपि
सास्यान्नानुविधेयत्वे। नचवाच्यंविधेयतत्तद्देवतान्विताभोज्यथाप्राप्यनुवादाभ्यांदधिभूताभ्यांवि
शिष्टप्रयोगोविधेयःस्यादिति। विधिविषयविशिष्टांतर्गतस्यविधेयसंदृष्टस्यदध्नःश्रुतस्यसोमा
रोरुंचमंनिवपिच्छुक्रामोब्रीहीणामित्यत्रविधिविशेषणस्यवानुवाद्यत्वायोगात्। तस्मान्मध्यमादि
वाक्येषुप्रकृतेतद्धर्मलिंगेनविधिरेवेष्टव्यः। ननुतर्हिगुणविधिरेवास्तुयस्मादविद्वत्कृतमिसा
द्यधिकारिविशेषणेदकालोपक्रांतप्रकृतकर्मप्रत्यभिज्ञानेजाग्रतितत्रगुणमात्रविधानम
त्तिलंक्ष्यगुणविशिष्टधर्मांतरविधिकल्पनायोगात्।। ज्ञातेचैवंप्रत्यभिज्ञाबलाद्गुणविधिता
स्त्वर्थेतदनुरोधेनापतन्नप्येकद्रव्योद्देशेनदेवतागुणविधानप्रयुक्तोवाक्यभेदोनदोषइतिचेद्दे
तत्रापिवाक्येष्वेवमेवगुणमात्रविधिःस्यात्। तत्रापियस्मोनयंहविरित्यधिकारिविशेषणेत
सान्नाय्यहविष्कप्रकृतकर्मप्रत्यभिज्ञानात्। यत्तुहविर्नाशिकर्मण एवनाशात्तत्रप्रकृतकर्मप्रत्यभि
ज्ञानमस्तीति।। तत्तुच्छं। उपात्तहविर्नाशेहविरंतरेसाध्येनकर्मानुष्ठानस्यशेषादवघातनाशेप्य
तदर्थत्वादित्यधिकरणेव्यवस्थापितत्वेनयस्यसर्वोलिहवींषिनक्षेयुर्दुह्येयुरपहरेयुर्वाआज्ये
नतादेवताःपरिसंख्यायाजतेतिश्रवणेनचकर्मलोपात्प्रकृतेरकालप्रकृतमंत्रतमित्तिप्राप्ते

किरत्राप्यकालोपक्रांतकर्मानावेनप्रत्यभिज्ञानानावश्यवक्तुशक्यत्वाच्च। तस्मादाग्नेयाकरुमध्य
मादिवाक्येष्वपिकर्मांतरविधिरेववक्तव्यइतिनास्तितत्रदार्शिकहविषांपूर्वदेवतापनयस्योपयोगः
कर्मांतरविधौतंदुलादेनामुद्देश्यत्वेनप्रकृतत्वेहेतुकारणत्वात्।। येमध्यमाइनियच्छद्भ्यस्य
तोपिद्रव्यदेवताविशिष्टकर्मविधौतंदुलानामुद्देश्यत्वापादनासमर्थतयापशुकामेष्टिगतमध्यमादि
वाक्यश्रुतयच्छब्देयावद्विवक्षितार्थतायाएवश्रुतेः। अतएवातंचनाभ्यासलिंगसमर्थनेकर्मांतर
विधिपक्षेप्रकृतद्रव्यग्रहणभावोनुद्देश्येष्वधिकरणएवचर्चितः। एवंहितत्। यदिविलीयादित्ति
मोदेष्यतीतिमहारात्रेहवींषिनिर्वपेत्। फलीकृतेस्तंदुलैकपासीतार्द्रंदधिहविरातंचनार्थंनिदध्या
द्दर्शनयदमुष्यित्तेनानभ्यवरोधादिनान्येषुस्तेनआलएनोजयेदिति। अस्यार्थः यःप्रकृतप्रातंत्रो
यजमानःकिमद्यचतुर्दशमेवामावास्यायांदर्शःआरब्धःकिंचंद्रमाःप्रमुद्देष्यतीतिशंकानयंप्रमु
यात्। समहत्यामेवरात्रौव्रीहीन्निरूप्यावहत्यफलीकृत्यौदीच्यमाएनआसीत्। सायंदोहसंपादितंच
दध्यानीतंचनाय
निदध्यात्। प्रातंतरंतदर्थंननिदध्यात्। एवंहतेयद्यमुद्यः। स्यात्तदामुख्यकालेदर्शआरंभानंतरमा
लंचनार्थंनिहितेनार्द्रेनदध्नासायंदुग्धंपयस्यालंचनंतुवादध्युत्पाद्यमानेघृतंधियागंनिर्वर्तयेत्र
यदिनाभ्युदयस्तदानीमालंचनार्थंनिहितादार्द्रदध्नेनार्द्रेनदर्शंनिर्वर्तेतस्तदर्थंदध्युत्पादनानपेक्षत्वेना

त्तेचनार्थनिर्हृतमर्द्रास्रक्तेनोजनेनप्रतिपादयेदितिनहेतद्दातंचनास्यासंदर्शनंसिद्धांतलिंगत्वे
नगणितंयदिकर्मांतरमुद्दयेद्दिःस्यात्तदापमुकामेष्टिवदधिश्रुतयोरधिकरणत्वेनप्रणीताकार्यवि
धानादुपादेयत्वेनचप्रकृतग्रहणप्रमाणत्वावाद्यौकिकएवद्विपयसिचप्रपाणेहव्यासायंदोहनाका
लक्लृप्तेनापिप्रायश्चित्तनिर्हृतकालापराधदोषेणमुख्यकालेदर्शःकर्त्तव्यःनदर्शांतरमुत्पादनीयं।यदि
॥६०॥ हकालएवप्रकृतंतदेवस्वकर्मदेवताविकारयुक्तंसदमुद्दयेद्दिःस्यात्तदातदर्थंस्तेनदर्शेनमुख्यात
स्थेवानुष्ठितत्वान्मुख्यकालकर्त्तव्यदर्शार्थमवश्यंदर्शांतरमुत्पाद्यमितिप्रकृतंचनं।तत्रमुख्यका
लप्रकृतंसायंदोहार्द्रेनेवातंचनंकार्यमित्येलावान्विशेषोविधीयतइति।नन्वेवंशांतिकर्मणिवेतालो
दयःकर्मांतरविधिपक्षेप्रकृतग्रहणन्यायप्रदर्शनार्थमातंचनास्यासलिंगमुपवर्ण्यतत्राप्येकर्मां ५८
तरविधौलिंगानुपपत्तिरुद्घाटिता-अतःकर्मांतरविध्युपगमोनयुक्तइतिचेदुच्यते।-प्रातंचना
स्यासलिंगंसमर्थ्यमानेनसिद्धांतिनाकर्मांतरविधिपक्षेप्रकृतग्रहणन्यायःसमर्थितइत्येता
वदस्मान्निरिहोपन्यस्तेनहातंचनास्यस्यसिद्धांतलिंगत्वपप्युनुमोदितं।-अकालक्लृप्तदध्नःकर्मा ॥६०॥
नर्हतयाप्यातंचनास्योपपत्तेःप्रायश्चित्तेनाकालक्लृप्तानिप्रधानदेवतापरिग्रहाद्विनापचा
रनिर्हरणवदकालक्लृप्तदध्नाकर्मांगत्वमपितेनप्रकृतमित्यत्रप्रमाणन्यायत्वं।नहिस्तेयप्रायश्चित्ते ६०

नस्तेयदोषनिर्हरणवत्तेयलक्ष्यस्यद्रव्यस्यकर्मार्हत्वमपिक्रियते।एवंकर्मांतरविधिपक्षेप्रकृत
द्रव्यग्रहणंनास्तीतिसिद्धांत्यनिमाननमनुसृत्यैवतापनयविधेरनुपयोगउक्तः।वस्तुतस्तस्मिन्नपिपक्षे ५८२
प्रकृतद्रव्यग्रहणनियमोस्त्येवयतस्तद्धिंगमेवयद्विविधियादित्यादिवाक्येचजागर्त्ति।तथाहि।फा
लीतेस्तदुलेकुपासीतेतिफलीकरणपर्यंतमेवक्लृप्तानदुलभावविनाशकंपेषणमक्लृप्तमुद्द ५८
श्यसदप्रकृतनिर्णयपर्यंतंव्रतीक्षणविधानादिदंज्ञायतेमध्यमादिदंदुलविनागापेक्षायांप्रमुद्द
श्येष्वामेनएवतेदुलाइतिप्रत्यथापेषणंतत्रागेवघटयोगमुपवस्थाप्यव्रतीक्षणमदृष्टार्थंस्यान्नात
॥६१॥ थाप्रातेचनार्थस्यदृष्टस्यामुद्दयानावपक्षइवतदप्रमुद्दयेद्दिःस्यान्मुद्दयपक्षेव्रतिपत्त्यविधानादिदं ५८३
ज्ञायतेमुद्दयेष्वातदेवान्मुद्दयेद्दधति।प्रत्यथामुद्दयानावपक्षेदध्नंतरोत्पादनस्यानपेक्षितत्वा
दातंचनार्थदध्नद्दिस्यव्रतिपत्त्यपेक्षावदमुद्दयपक्षेतदितरद्दिस्यलौकिकदधिसाध्यायाममुद्दयेष्वां
दध्नंतरोत्पादननिर्वर्त्यमुख्यकालदध्नोचानुपयोगात्तत्रतिपत्त्यपेक्षास्तीतितत्रतिपत्तिरप्युपवर्ण्य
तानथाविरुद्धवैशिष्ट्यविशिष्टायशूलेबध्नातिशूलपदव्रतयोगात्तत्रायतेमुद्दयेष्वांवैदिकश्रपीद्वया
रुद्धाशूलशब्दवाच्यःप्रातर्दोहएवपयोनतुलौकिकंपयइति।प्रत्यथाऽऽदित्यव्रतायणीयःपयसि
चरुरित्यत्रैवपयःशब्दएवव्रयुज्येत।ननुपशुकामेष्टेर्लौकिकपयःसाध्यायामपिश्रुतपदंश्रूयते।सत्यंत
त्रश्रुतशब्दैःश्रपणवतोलौकिकपयसोलक्षणार्थइतिसूत्रकृतोक्तंपशुकामेष्वपिकरणेलक्षणाश्रा

श्रुतस्मृतिरिनचेहलक्षणयोंत्रमाणमस्ति। अक्रतस्यश्रुतराष्ट्रमुख्यार्थस्यसंभवात्। ननुकर्मांतरार्थद्रव्याणांकर्मांतरार्थत्वमयुक्तमितिचेत्। किमेकस्मिन्नपिवाक्यशेषेदेवतांतरार्थद्रव्याणांदेवतांतरार्थत्वंयुक्तं। वचनबलाद्युक्तमिति। तूष्णयत्रापित्रुट्यं। एवंकर्मांतरप्रदेशालेचनात्त्यासउपपन्नः अक्रतस्यदध्नःकर्मांतरेविनियुक्तहेनमुख्यकालकर्त्तव्यदर्शेदध्यंतरापेक्षासत्वात्। एवंतर्हिदेवतापनयविधेरनुपयोगःप्रत्युक्तःस्यादृष्टिकिद्रव्याणांकर्मांतरेसमुदयेष्टौविनियोगार्थदार्शिकदेवतापर्यंतेविधेरपेक्षितत्वात्।। अर्थस्तिद्रव्यविधेर्नास्त्युपयोगइतिचेत्। एवंपूर्वश्लोकअपदिशतार्थस्तिद्रव्यहेतुनैवान्नाप्यनुपयोगवर्णनायामंत्रश्लोकेसमर्पितस्यकर्मांतरस्थस्यहेतुनयातद्देयार्थप्रसंगइतिचेत्। उच्यते। पूर्वश्लोकेतंदुलादिद्विद्योपांशुयाजाज्येदेवतापनयस्यार्थस्तिद्रव्याभावात्तत्रतद्विधेरर्थवत्मित्याशंकाऽभावाय्यायोपांशुयाजावसमर्थनेननिराकृता। अत्रतुलस्याश्रुपगम्यापांशुयाजमश्रुद्येष्टेस्ततः। कर्मांतरस्थसमर्थनेनस्थानिक्रियते। कर्मांतरस्थेहितत्रोपांशुयाजाभावेनतद्विषयतयादेवतापनयविधेरर्थवत्तानवर्तीतिज्ञापनः। एवंतर्हश्रुद्येष्टेःकर्मांतरस्थेपितदेवतास्वरूपःअक्रतहविषांविनजनविधिःस्यादेवउपांशुयाजाज्येतस्यार्थवत्त्वात्। कर्मांतरेश्रुद्येष्टावुपांशुयाजाभावेपिन्नहतहविरंतर्गतोपांशुयाजाज्यस्याश्रुद्येष्टिदेवतास्थोविनजनोपपत्तेरितिस्यांचेन्मुख्या ॥६१॥ २१

निराकरोति। तर्हिस्यादेवतास्वरूपःप्रविनजनविधिस्तत्रतदुभिनौस्योनस्यादेवंहिसर्वास्वपिदध्यिश्रुतयोर्देवतास्वन्वयःस्यात्। तस्मिन्वाक्येविधेयंविनजनमिहचेद्वस्यमाणअकारेनस्यादेपांशुयाजेहविषांनदितिन्नूसर्वथाव्यर्थमेव।। ५१।। यदिअक्रतहविषामविशेषेणश्रुद्येष्टिदेवतास्थोविनजनमितिमंत्रतोदध्यिश्रुतयोरपिसर्वदेवतान्वयःस्यात्। उत्तरत्रतयोर्विशिष्यसंकीर्त्तनंस्थविष्ठेरणिश्चैष्यतंदुलैःसहश्रपणनियमार्थंस्यात्। अथवक्ष्यमाणअकारेणविनजनविधिस्त्रेधातंदुलान्विनजेदितिवाकेंगीक्रियते। तथाचदध्यिश्रुतयोर्वक्ष्यमाणदेवताविशेषव्यवस्थानंनजप्तदुतिमंत्रतोपांशुयाजाज्येवक्ष्यमाणदेवतान्वयअकारोनास्तीतिविनजनवाक्यंतद्विषयत्वेनार्थवन्नभवेत्। तंदुलदध्यिश्रुतेषुतुतत्तद्यागैरेवतथातथाविनजनंसिद्धमितिसर्वथाव्यर्थमेवत्रेधातंदुलानितिवाक्यं। अत्रतंदुलशब्दलक्षणाश्रेयोपितद्देयार्थानपायात्तस्ययथाश्रुतानुवादकत्वमेवयुक्तमितितत्रविध्यन्नावात्तद्विध्याक्षिप्तवर्णनमप्यसमंजसमितिन्यायः।। एवमाद्विग्रेषपूर्वविध्यादीनांलक्षणेषूदाहरणेषुलक्षणनिर्व्यवस्थापयितुंनियमपरिसंख्यालक्षणसंग्राह्यसंदेहपदानिनिर्धारयन्तेवलक्षणव्यवस्थापनेत्रतोजानीते। एवंशास्त्रेनणमस्तिविधिविधिजुषांलक्षणनाविशागंदर्शयेयःससर्वोन्नयतिनियमइत्यनुपेत्यव्यवस्थां। अर्थाद्वाशब्दोवास्वविषयगतितादेवकारान्न

॥६२॥

वायः स्यात्तस्यापि बाधास्तत्रवर्त्तिपरिशेषेसेतिरीतिंचकृत्वा॥ ६२॥ आगम्यतादिविधीनाम
दृष्टार्थानामप्राप्तविषयत्वादपूर्वविधित्वमंगीकृत्यतेषुलक्षणव्याप्तिरुक्ता॥ पूर्वाधिकारमंत्रनि
यमविध्यनित्यप्रयुक्तावेननत्समानन्यायतयासर्वेषामपिदृष्टार्थविधीनांनियमविधित्व
मपिसूचितं। तथानिषेधरूपविधिषुपूर्वविधिलक्षणव्याप्तयुक्तावेनदीक्षितोनजुहोतीत्यादिनो
नपूर्वविधित्वंसूचितं। तथानिषेधमात्रस्यपरिसंख्यात्वमुपगम्योप्यसूचितेनात्रनियम
परिसंख्यालक्षणसंग्राह्यसंदेहप्राप्तविदमुच्यते। अप्राप्तविषयःप्राप्तविषयोविधिर्दृष्टा
र्थःसन्सर्वोपिनियमविधिरित्यभ्युपगच्छामः। अप्राप्तविषयोपितस्मिन्नियमादृष्टाभ्युपग
मावश्यंनावात्। तथाहिदृष्टार्थाप्राप्तविधिविषयोद्विविधःविधिंविनास्वतःप्रसिद्धदृष्ट्य
योजनजननसामर्थ्योविधिबलप्रसादनियतलक्षणजननसामर्थ्यश्च। तत्रौदुंबरोयूपोन
वतीत्याद्यःप्रकृतौयूपेपक्षप्राप्तोप्यौदुंबरःखदिरादिनियमविधिनानिवर्त्तितइतिविकृ
तावपिचोदकात्। खदिरादेरेवप्राप्तस्यविधिविषयन्यायेनसोमापोक्षणपक्षे
वप्राप्तेरौदुंबरजातिरष्टास्त्रक्वादिविशिष्टरूपाप्तिजननेस्वतएवप्रसिद्धदृष्टसामर्थ्यवि
शेषः। उत्तराद्याधारणाख्यछेदनमंत्रोल्करपरिध्यादिद्वितीयाविधिबलादेवहिंस्रएष्यगर्भमंत्रा

॥६२॥

स्यौएवक्तिकल्पनयेंद्रप्रकाशनेदृषेत्वेतिमंत्रस्यछिनत्तीत्यध्याहारेणशाखयाछेदनप्रकाशनेउल्करस्य
पृथग्गताकरणेनवाज्जिनपात्रधारणेपरिधेःस्रुविमग्रहणेनपशुनियोजनेचसामर्थ्यप्रसाधनीयं॥
ततश्चतद्द्वैविध्यात्ततद्विषयोविधिरपिद्विविधःएवंद्विविधेष्वप्राप्तप्राप्तिफलकदृष्टार्थविधौनिय
मादृष्टाभ्युपगमआवश्यकःचोदकप्राप्तखदिरादिनापिसंजनयतियूपादिस्वरूपमात्रेऔदुंबरादिनियम
विधानस्यानर्थक्यात्। अतएवाहुः। दृष्टार्थेष्वपिसर्वेष्वनियमादृष्टमिष्यतइतिःअन्यथावह्ननादिनि
यमविधावपिनियमादृष्टकल्पनंनस्यात्। नानोपायसाध्येदृष्टप्रयोजनेविशिष्टस्यकस्यचिन्नियमो
नर्थकस्तस्यक्रत्वपूर्वोपयोगित्वमितितत्रसंक्षारंविनानुपपन्नं। क्रत्वपूर्वस्यप्रधानानुष्ठानानंतर
मविद्यादिस्तेतस्वहितेषुनियमादृष्टकल्पनायांबीजं। तदिहापिलभ्यं। नियमादृष्टाभ्युपगमेचनिय
मविधित्वमेवप्राप्नोति। अतएवस्रुतीविधेःपक्षप्राप्तविषयत्वाभावेपिनियमविधित्वं॥ सर्वत्र द्र
व्यविधयोनियमविधयइतिसकलमीमांसकप्रवाहश्च। अपिचनावमिकेपत्नीसंयाजाधि
करणेपत्नीसंयाजांतान्महानिसंनिधेतइत्यस्यनाष्णादिषुयन्नियमविधित्वमुक्तं। तदप्य
प्राप्तस्थेवपत्नीसंयाजांतत्वस्यदृष्टार्थतामात्रेणनतुतस्यपाक्षिकप्राप्तानुवादसंजनयात्। तथा
हियद्यपिहादृशानामूंसहप्रयोगवचनात्पूर्वपूर्वमहःकस्मिंश्चित्पदार्थेविस्राप्यपरंपरंप्रयु
ज्यमानंतथापिपत्नीसंयाजेष्ववस्थापनपक्षेपिनप्राप्नोति। उपांध्वादिर्द्विरियोजनपर्यंतसोमयागो

ग्रहः प्रकृतेनोच्यते। यथोक्तंतंत्ररत्नेज्योतिष्टोमेग्रहः प्रकृतेनऽपांग्र्यादिहविर्योजनपर्यंतःसोमयागःपरि
छिन्नइहापिद्रष्टव्यइहएवंद्रष्टव्यमितिं।तथाचसहस्रसिध्यर्थंहविर्योजनानंतरमेवावस्थानंप्राप्नोति।
यदिवसंतीवरीपर्यंतानिपूर्वाणितंत्रमध्यकालंहावत्यादीन्युत्तराणितस्यैवाविसर्गार्थंहि
तिसूत्रोक्तरीत्याद्रष्टव्यंहवसंतीवरीपर्यंतानांपूर्वेषामवत्यादीनामुत्तरेषांचांगानांतंत्रत्वेपिनेतरक्र
तुकर्मनेदःप्रयोगेःस्यात्तेषांप्रधानशेष्वादितिसूत्रोक्तन्यायेनप्रधानैरेवयद्वाज्यानिसंयोगानित
त्तत्प्रधानकालेनेदेनानुष्ठेयानीतितत्तत्सुत्याकालिनानोमेष्टिकयाश्रुकर्मणांसंयोगोतत्रतत्राहवनी
येनेदेनानुष्ठानंप्राप्नुयात्तूंतदाकालेनेदेनपाश्रुकैष्टिकप्रयोगसमाप्यनंतरमेवावस्थानंप्राप्नोतिं।सर्वेषा
मपिपत्नीसंयाजानंतरमवस्थानस्यनपात्तिकीप्राप्तिरस्ति।तथाचपत्नीसंयाजोनोग्नीषोमीयःसंतिष्ठ
तइतिवद्प्राप्तविधिरेवायं।तथापिसहस्रनिर्वाहकतयाद्रष्टव्यंतासत्रातावन्मात्रेणनियमवि
धित्वंनाप्यादिसूत्रमितिनियमार्थनीयं।अनियमेप्रोक्तेपत्नीसंयाजांतेसंस्थातव्यमितिनियम्यत ॥९३॥
इतिनाष्यंचहविर्योजनोत्तरंद्रेवप्राप्तापत्नीसंयाजांतनियमस्यात्रावेप्राप्तइत्येवंयोजनीयं॥
यस्मिन्कस्मिंश्चिन्नियमेनावस्थानेप्राप्तेपत्नीसंयाजांतताविनियम्यतइतितंत्ररत्नमपिहविर्
योजनप्रचारेपश्चादिसमापनकर्मलिंगायस्मिन्कस्मिंश्चित्स्थानेपत्नीसंयाजांतनियमनंविनावस्था
नेप्राप्तइतियोजनीयंननुयथाश्रुतंयाज्यंपत्नीसंयाजांततायाअनियमतःप्राप्तस्यावस्थोक्त्यात्र॥

परिसंख्यालक्षणेक्षेपेतुयथाश्रुतंकृष्याद्यनुरोधान्ननियमोस्मीतिकुपम्यस्तः।तस्माद्द्रष्टव्यः सा
वेविधिर्नियमविधिरितियुक्तमेवचैवंपुत्रेष्टिकार्यंधर्महविधेर्नियमविधेस्वप्रसंगः।प्रदर्शनद्वारंत्वस्य
स्यापिविवक्षितत्वात्॥तथार्थाद्वास्वविषयप्रच्युत्यात्रक्षणिकश्रुताद्वाएवकाराद्वानपदाद्वाऽन्यो
यस्मकस्मिंश्चिन्नावस्थात्रावस्थवायोबाधःससर्वोपिपरिसंख्येतिमर्यादांक्रमहे॥तत्रानिहाये दो
र्हिःप्रतिसमानयतिऽजुह्वाऽऽमोपहरतमित्यत्रार्थादुपरितनप्रयाजद्वयेजौहवाज्यस्याग्नीनाघ्र
याजत्रयेऽऔपहरताज्यस्यचबाधः।हेःप्राहवनीयइत्यत्रयद्वाहवनीयेऽजुह्वतीतिसामान्यशास्त्रआ
त्तिर्विधिरूपस्वरूपविषयप्रच्युतात्प्राप्तनिषेधरूपार्थांतरलक्षकात्तस्मादेवशेष्वाद्ग्निहोत्रादु
त्थेतरस्यास्रुचोहवनीयबाधः।प्रत्रयेवावपंतीतत्रैवकारेणपचमानान्निरिक्तस्तोत्रेष्वावापबा
धः।नतोपहरोतीत्यत्रनञ्ऽपदेनपशावाज्यत्यागबाधः।स्यादेतन्नञ्ऽपदंसर्वोपिनि
षेधःपरिसंख्येत्यंगीकर्तुंयुक्तं॥विधावियंनिषेधेपिअपूर्वविध्यादिरूपेत्रैविध्यसंभवात्शाब्द
तोहिदक्षिणोनजुहोतीत्यादिरपूर्वविधिःनहिंस्यादित्यादिर्नियमविधिर्नानुयाज्ञानित्यादेःपरिसंख्ये
तिवर्तुंमितिचेत्।मैवंपरिसंख्याशास्त्रार्थवर्जनेबुधिजनकल्पनसोपिपरिसंख्याद्यस्याप्रत्यक्ष्य
तयातद्योगेनजुहोतीतिनहिंस्यादित्यादेपिपरिसंख्यात्वस्यानिगार्यत्वात्।तत्रचान्यत्रचप्राप्तइति
लक्षणानुसारेणापितस्यपरिसंख्यात्रप्राप्तिःतद्यावर्तनायतत्रविशेषणांतरविवक्षायाअप्यपरि

विधिरसायनं

व्याप्त

॥६४॥

८४

संख्यालक्षणाक्षेपे दूषितत्वात्॥ अत्र ह्येवमपंतीति परिसंख्यायां तत्र चान्यत्र प्राप्त इति यथा
श्रुतलक्षणस्याप्यभावाच्च। तस्मादर्थाल्लक्षण एवकारप्रतिपाद्यो नञर्थभूतश्च सर्वोपि निषेधः
परिसंख्येति युक्तं॥ उक्तं च न्यायसुधायां। परिसंख्यावर्जनबुद्धिस्तदर्थो निजादिः परिसंख्याशब्दस्त
द्योगाद्ब्राह्मणो नहंतव्यो नैक्षेतोद्यंतमादित्यमित्यादीनामेव श्रुत्या परिसंख्यात्वं निषेधपर्युदासव्य
पदेशविशेषात्तु व्यवहारसिद्धेर्न परिसंख्याव्यपदेशः। सत्यमेव वदितव्यमित्यादीनामेवकार
श्रुत्या नियतत्वमन्यत्र तु फलेनैव नियमपरिसंख्याव्यपदेश इति। एवं दृष्टार्थः सर्वोपि विधि
र्नियमविधिरिति सर्वोपि निषेधः परिसंख्येति चांगीकृत्य पूर्वविध्यादीनां लक्षणानि विभज्य
प्रदर्शयिष्यंत इत्यर्थः तान्येव लक्षणान्याह॥ ॥ ॥

८४

॥६४